# કલ્કિકૃતં શિવસ્તોત્રમ

## **Kalkikrutam Shivastotram**

કલ્કિ કૃતં શિવ સ્તોત્રમ

ગૌરીનાથં વિશ્વનાથં શરણ્યં ભૂતાવાસં વાસુકીકણ્ઠભૂષમ ।
ત્ર્યક્ષં પઞ્ચાસ્યાદિદેવં પુરાણં વન્દે સાન્દ્રાનન્દસન્દોહદક્ષમ ।।૧।।

યોગાધીશં કામનાશં કરાળં ગઙ્ગાસઙ્ક્લિન્નમૂર્ધાનમીશમ।
જટાજૂટાટોપરિક્ષિપ્તભાવં મહાકાલં ચન્દ્રભાલં નમામિ ।।૨।।

શ્મશાનસ્થં ભૂતવેતાળસઙ્ગં નાનાશસ્ત્રૈઃ ખડ્ગશૂલાદિભિશ્ચ ।
વ્યગ્રાત્યુગ્રા બાહવો લોકનાશે યસ્ય ક્રોધોદ્ભૂતલોકોઽસ્તમેતિ ।।૩।।

યો ભૂતાદિઃ પઞ્ચભૂતૈઃ સિસૃક્ષુસ્તન્માત્રાત્મા કાલકર્મસ્વભાવૈઃ ।
પ્રહૃત્યેદં પ્રાપ્ય જીવત્વમીશો બ્રહ્માનન્દે ક્રીડતે તં નમામિ ।।૪।।

સ્થિતો વિષ્ણુઃ સર્વજિષ્ણુઃ સુરાત્મા લોકાન્સાધૂન્ધર્મસેતૂન્બિભર્તિ ।
બ્રહ્માદ્યંશે યોઽભિમાની ગુણાત્મા શબ્દાદ્યઙ્ગૈસ્તં પરેશં નમામિ ।।૫।।

યસ્યાજ્ઞયા વાયવો વાન્તિ લોકે જ્વલત્યગ્નિઃ સવિતા યાતિ તપ્યન ।
શીતાંશુઃ ખે તારકાસઙ્ગ્રહશ્ચ પ્રવર્તન્તે તં પરેશં પ્રપદ્યે ।।૬।।

યસ્ય શ્વાસાત્સર્વધાત્રી ધરિત્રી દેવો વર્ષત્યંબુ કાલઃ પ્રમાતા ।
મેરુર્મધ્યે ભુવનાનાં ચ ભર્તા તમીશાનં વિશ્વરૂપં નમામિ ।।૭।।

ઇતિ શ્રીકલ્કિપુરાણે કલ્કિકૃતં શિવસ્તોત્રં સંપૂર્ણમ ।।

**www.shaivam.org**